काण्व शाखीय

# शुक्ल यजुर्वेद जटा पाठ :

## अथ प्रथमोऽध्याय :

इषे त्वा त्वेष इषे त्वा । त्वोर्ज ऊर्जे त्वा त्वोर्जे । ऊर्जे त्वा त्वोर्ज ऊर्जे त्वा ।
त्वा वायवो वायव स्त्वा त्वा वायव : । वायवस्थस्थ वायवो वायवस्थ । स्थ देवो
देव स्स्थ स्थ देव : । देवो वो वो देवो देवो व : । व स्सविता सविता वो व

स्सविता । सविता प्र प्र सविता सविता प्र । प्रार्पयत्वर्पयतु प्र प्रार्पयतु । अर्पयतु
श्रेष्ठतमायश् श्रेष्ठतमाया पर्यत्वर्पयतुश् श्रेष्ठतमाय । श्रेष्ठतमाय कर्मणे कर्मणेश्
श्रेष्ठतमायश् श्रेष्ठतमाय कर्मणे । श्रेष्ठतमायेतिश् श्रेष्ठ = तमाय । कर्मण
आप्यायध्वं प्यायध्वमा कर्मणे कर्मण आप्यायध्वम् । आप्यायध्वम् ।
प्यायध्वमघ्न्या - अघ्न्या : प्यायध्वं प्यायध्व मघ्न्या : । अघ्न्या -
इन्द्रायेन्द्रायाघ्न्या - अघ्न्या - इन्द्राय । इन्द्राय भागं भाग मिन्द्रायेन्द्राय भागम् ।
भागं प्रजावती : प्रजावती र्भागं भागं प्रजावती : । प्रजावती रनमीवा -

अनमीवा : प्रजावती : प्रजावती रनमीवा : । प्रजावतीरिति प्रजा = वती : । अनमीवा - अयक्ष्मा - अयक्ष्मा - अनमीवा - अनमीवा - अयक्ष्मा : । अयक्ष्मा मा मा यक्ष्मा - अयक्ष्मा मा । मा वो वो मा मा व : । वस्तेन स्तेनो वो व स्तेन : । स्तेन ईशते शत स्तेन स्तेन ईशत । ईशत मा मेशते शतमा । माऽघशँसो ऽघशंऽसो मा मा ऽघशँ स : । अघशँसो ध्रुवा ध्रुवा - अघ शंऽसो ऽघशँसो ध्रुवा : । अघशँस इत्यघ = शँस : । ध्रुवा - अस्मि न्नस्मिन् ध्रुवा ध्रुवा - अस्मिन् । अस्मिन् गोपतौ गोपता - अस्मि न्नस्मिन्

गोपतौ । गोपतौ स्यात स्यात गोपतौ गोपतौ स्यात । गोपता इति गो = पतौ । स्यात बह्वी र्बह्वी स्यात स्यात बह्वी : । बह्वी र्यजमानस्य यजमानस्य बह्वी र्बह्वी र्यजमानस्य । यजमानस्य पशून् पशून् यजमानस्य यजमानस्य पशून् । पशून् पाहि पाहि पशून् पशून् पाहि । पाहि वसो र्वसो : पाहि पाहि वसो : । वसो : पवित्रम् पवित्रँ वसो र्वसो : पवित्रम् । पवित्र मस्यसि पवित्रम् पवित्र मसि । असीत्यसि ।।१।।